त्रैमासिकी / जून २०२३

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥



जून २०२३

# अनुक्रमणिका


| | |
|---|---|
| गुरूपदेशः | १ |
| निवेदनम् | १ |
| चिन्तनम् | २ |
| सुभाषितम् | ३ |
| पावनकार्ला-गुरुक्षेत्रम् | ४ |
| अद्भुता अनुभूतिः | ४ |
| कथा मनीषापञ्चकस्य | ६ |
| ईदृशः एकः राष्ट्रपतिः | ७ |
| बालरञ्जनी | |
| एकाग्रता | ८ |
| शब्दपटः | ९ |
| तस्मै पाणिनये नमः | १० |
| रुचिरा | १२ |
| हास्यकणिका | १२ |
| छान्दोग्य - उपनिषत् | १३ |
| योगविषये किञ्चित् ... | १४ |
| उत्तराणि | १४ |

## ॥ गुरूपदेशः ॥



दशमगुरु-परमपूज्य-
श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।

भवद्भिः सर्वैः मनसि सर्वदा संस्मर्तव्यं यत् अस्मिन् जगति वयं स्वस्य वास्तविकरूपं ज्ञातुम् आगताः तथा अयमेव अस्माकं जीवनस्य उद्देशः ।



एकादशगुरु-परमपूज्य-
श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।

सत्सङ्गः अर्थपूर्णः भवितव्यः। सत्सङ्गः अन्तर्दृष्टिं प्रददाति तथा नैकान् भ्रमान् दूरीकरोति, किन्तु अस्यां प्रक्रियायां सत्सङ्गस्य तात्पर्यम् अस्माभिः ज्ञातव्यम् ।

गुरूपदेशानुवादः - वरदा सौकूर , मुम्बई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः। ॐ श्रीभवानीशङ्कराय नमः। ॐ श्रीमात्रे नमः ।

वैशाखमासस्य शुक्लपक्षस्य पञ्चम्यां तिथौ अद्वैतवेदान्तप्रतिपादक-महद्-ग्रन्थकार-प्रस्थानत्रयभाष्यकार-जगद्गुरुशङ्कराचार्याणां जयन्तिः। जगद्गुरुशङ्कराचार्याः तु साक्षात् भगवतः ईश्वरस्य अवतारः। तत्कालीन-समाजे प्रचलितं पुराणरीत्यनुसारित्वं , धार्मिक-अन्धानुकरणं निराकृत्य ज्ञानोपासनायाः मार्गं सन्दर्श्य , वेदाः ईश्वरप्रणीताः एव इति सम्बोध्य , जगद्गुरुशङ्कराचार्याः हिन्दुधर्मस्य पुनरुत्थानं कृतवन्तः । सरल-पूजाविधानं संयोज्य सगुणोपासना एव निर्गुण-निराकार-ब्रह्मप्राप्तेः साधनम् इति प्रतिपादितवन्तः । तस्मात् अन्धश्रद्धाप्ररूढसमाजे जनजागृतिः सम्प्रवृत्य सर्वत्र आध्यात्मिक-तरङ्गः प्रसृतः। वेदान्तप्रचारे संलग्नाः सम्भूय केवलं द्वात्रिंशत् - वर्षकालांशे अखिलभारतभ्रमणं कृत्वा चतुर्दिक्षु मठस्थापनं कृत्वा बौद्धिक-तात्विक-धार्मिकादि- भिन्नस्तरेषु एकसूत्रताम् आनेतुं, साधयितुं च आचार्याणां प्रयासः विलक्षणः एव।

अस्माकं श्रीवल्लीमठे सर्वे साधकाः जगद्गुरुशङ्कराचार्याणां जयन्तिम् अत्युत्साहेन श्रद्धया च आचरितवन्तः।

परमपूज्य सद्योजात-शङ्कराश्रम-गुरुवर्याणां पवित्रसान्निध्ये शाङ्करभाष्यस्य भगवद्गीता-कठोपनिषद्- ब्रह्मसूत्रतः केषाञ्चन अंशानां सामूहिकपठनेन , गुरुवर्याणां करकमलाभ्यां जगद्गुरुशङ्कराचार्याणां सम्पन्नपूजनेन मठपरिसरः पुनीतः सञ्जातः । तथा गुरुवर्याणाम् उपदेशात्मक-आशीर्वचनेन वयं सर्वे धन्यताम् अनुभूतवन्तः।

दृतमेव विधेहि कृपां सहजाम्।
भव शङ्कर देशिक मे शरणम् ॥ (तोटकाष्टकम्)

इति सम्प्रार्थ्य गीर्वाणपत्रिकायाः तृतीयवर्षस्य प्रथमपुष्पं श्रीचरणकमलयोः सादरं सविनयं समर्पयामः ।

-सम्पादिका

## चिन्तनम्

- सुजाता हळदीपुर , मुम्बई

गतनव्हेम्बरमासे गीर्वाणप्रतिष्ठया आयोजिते चिन्तने 'तवैवास्मि ' इति वचनम् अधिकृत्य चिन्तनं सञ्जातम् । अस्य चिन्तनस्य सारांशः अधः दीयते।

- **' तवैवास्मि ' ईदृशी भावना केन कं प्रति प्रकटीकृता भवितुं शक्यते?**

  बालकेन मातरं प्रति , छात्रेण अध्यापकं प्रति , मित्रेण आत्मीयस्नेहितं प्रति , प्रियतमया प्रियकरं प्रति , भक्तेन देवं प्रति , रुग्णेन वैद्यं प्रति , शिष्येण गुरुं प्रति ईदृशी भावना भवितुं शक्यते ।

- **एतद् वचनं कीदृशान् भावान् दर्शयति?**

  ' तवैवास्मि ' वचनम् अत्यन्तनिकटसम्बन्धं , घनिष्ठाप्रीतिं , नितरां श्रद्धां , वैराग्यं , समर्पणं , सम्पूर्णशरणागतिम् इत्यादीन् भावान् प्रकटीकरोति।

- **यदि भक्तस्य कृते देवः एव सर्वस्वं तर्हि जन्मदात्रीमात्रा सह वा तादृशैः अन्यबान्धवैः सह तस्य कीदृशः व्यवहारः भवेत् ?**

  व्यवहारे एतैः जनैः सह सम्बन्धः तु अनिवार्यः। तेषां विना जीवनम् अशक्यम्  एव । किन्तु एकः श्रेष्ठः भक्तः सर्वेषु तस्य प्रियं देवमेव पश्यति । तथा

  ' त्वमेव माता च पिता त्वमेव , त्वमेव बन्धुश्च सखा त्वमेव ।
  त्वमेव विद्या द्रविणं त्वमेव , त्वमेव सर्वं मम देव देव ॥ '
  एतेन  भावेन व्यवहरति । मम प्रियदेवः एव मातृरूपेण , पितृरूपेण , बन्धुरूपेण  मया सह व्यवहारं करोति इति विश्वासेन जीवनं यापयति।

- **अन्यः अपि एकः दृष्टिकोणः –**

  भक्तः चिन्तयति – " एतस्मिन् जगति एते भिन्नभिन्नाः सम्बन्धाः मम कृते अनिवार्याः एव । तथापि सः जानाति यत् एते सर्वे सम्बन्धाः तात्कालिकाः अशाश्वताः च । मम शाश्वतसम्बन्धः अस्ति केवलं गुरुणा सह , यः जन्मजन्मान्तरे मम उद्धारार्थं मानवशरीरं धारयित्वा प्रकटीभवति । यावत् पर्यन्तम् मया तत् परमोच्चपदं न प्राप्यते तावत् पर्यन्तं सः मां न त्यजति। " सः भक्तः प्रार्थयते यत् गुरुः एव मम आप्तः । एतस्मात् मम वियोगः कदापि न भवेत् । एकस्य धनिकस्य गृहं स्वगृहमिति मत्वा कार्यं कुर्वती सेविका इव सः भक्तः अन्यैः सह व्यवहारं करोति । यथा एषा सेविका धनिकस्य पुत्रं स्वपुत्रमिव पालयति किन्तु हृदये निश्चितरूपेण जानाति यत् एतत् न मम गृहं न मे एषः पुत्रः। मम स्वस्य गृहं , मम आप्तजनाः च भिन्नाः एव यैः सह मम दृढतर-अनुबन्धः अस्ति।

- **अस्मिन् सन्दर्भे स्मर्यते हनुमतः वचनम् –**

  दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः।
  हनुमाञ्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥

  एतस्मिन् जगति यदा अहम् अन्यजनैः सह व्यवहारं करोमि तदा मम परिचयः भिन्नः भवितुं शक्यते । किन्तु अहं दृढतया जानामि यत् मम शाश्वतसम्बन्धः केवलं मम गुरुणा सह एव अस्ति इति ।

- **परमपूज्यपरिज्ञानाश्रम - स्वामिवर्यैः उक्तं वचनम् -**

  'भवान् मम' इति प्रथमसोपानः ।

  'तवैवाहम्' इति द्वितीयः सोपानः।

  'तवैवांशोऽहम्' इति अन्तिमसोपानः यत्र गुरु-शिष्ययोः वा भगवान्-भक्तयोः सायुज्य-ऐक्यं साध्यते।

## सुभाषितम्

**- जिज्ञा ढोलकिया , मुम्बई**

**सदयं हृदयं यस्य भाषितं सत्यभूषितम् ।**

**कायः परहिते यस्य , कलिस्तस्य करोति किम् ॥**

**भावार्थः -**

यस्य हृदयं दयापूर्णम् अस्ति , वचनं सत्येन अलङ्कृतम् अस्ति , शरीरं परोपकाराय समर्पितं च भवति , कलिः तस्य किं करोति?

अर्थात् कलिः तस्य कामपि हानिं कर्तुं न शक्नोति ।

## पावनकार्ला-गुरुक्षेत्रम्

**- आरती अरुण सशीतल , मुम्बई**



परमगुरुपरिज्ञानाश्रम-सन्निधानं
कार्लागुरुक्षेत्रे चिरकालमविरतम् ।
सञ्जीवनी -समाधि- दर्शनं
करोति मनः शान्तं तृप्तम् ॥१॥

तेषामहर्निशस्मरणेन
भवति दुःखक्लेशहरणम् ।
तेषां केवलं कृपाकटाक्षेण
अहो भवति सुखमयजीवनम् ॥ २ ॥

नितरामस्माकं श्रीगुरुपदि
अस्ति चेत् अखण्डविश्वासः ।
निःसंशयं भवत्येव शिरसि
तेषां कृपा-वरदहस्तः ॥ ३॥

प्रतिवर्षं कार्लायां भवति
गुरुवर्याणां जन्मोत्सवः ।
आस्वादयितुं तं समायाति
भक्तजनानां महासागरः ॥ ४॥

अचिरदर्शनाय तेषां
भवति मनः अधीरम् ।
प्रणम्य तान् सानुरागं
प्राप्नुमः तेषां शुभाशिषम् ॥ ५ ॥

## अद्‌भुता अनुभूतिः

**- श्यामला हेब्ळे , बेङ्गळूरु**

मम जीवने बहुवर्षेभ्यः पूर्वं श्रीमत्परिज्ञानाश्रम-गुरुवर्याणां कृपाकटाक्षेण घटितः अयम् एकः अविस्मरणीयः प्रसङ्गः ।

१९८२ तमे वर्षे अस्माकं वासः चेन्नै-नगरे आसीत्। ग्रीष्मकालस्य विरामदिनेषु वर्तुलपर्यटनं (Circular tour) कर्तुम् ऐच्छन् मम पतिः महायोजनां कल्पितवान्।

चेन्नै-नगरतः रेलयानेन शिरालीग्रामं श्रीचित्रापुरमठ-रथोत्सवार्थं गमनम् । ततः लोकयानेन गोवानगरं मङ्गेशी-शान्तादुर्गा-नागेशी- आदीनां कुलदेवतानां दर्शनार्थं प्रवासः । तस्मात् मुम्बापुरीं कोङ्कणसेवक-नाम-यात्रिकनौकया जलयात्रा-प्रयाणम् । तत्र मम ननान्दुः पुत्र्याः विवाहे भागम् ऊढ्वा अनन्तरं ततः चेन्नै-नगरं प्रत्यागमनम् । एवमासीत् अस्माकं वर्तुलपर्यटन-योजना ।

तदर्थं चिटिकाक्रयणम्, गोवानगरे वसतिगृहव्यवस्थापनम्, अस्माकं बान्धवेभ्यः आगमन- सूचनापत्र- प्रेषणम् इत्यादयः सिद्धताः आरब्धाः । अस्माकं प्रयाणं सुव्यवस्थितं भवेद् इत्यर्थं मासद्वय-पूर्वमेव मम पत्या कार्याणि कृतानि ।

वयं गृहसदस्याः पञ्चजनाः रथोत्सवार्थं दिनत्रयपूर्वमेव शिरालीमठं प्राप्तवन्तः । तत्र सर्वेषु कार्यक्रमेषु आनन्देन भागं स्वीकृतवन्तः । रथोत्सवदिने मध्याह्ने पताकाभिः विभूषितरथस्य कर्षणं क्षेत्रे जनैः भवति । रात्रौ अस्माकम् आराध्यदेवः भवानीशङ्करः वैभवेन शिबिकायाम् उपविश्य पर्यटनं कृत्वा (मृगबेटे) मृगयार्थं गत्वा उषःकाले मठं पुनरायाति । तत्र राजाङ्गणे अलङ्कृते मण्डपे विराजमानः भवति। तदा भक्ताः ' वोक्कुली ' इति कार्यक्रमे वर्णमिश्रित-जलेन अन्योऽन्यं सिञ्चयन् क्रीडन्ति।

अस्माकं श्रीपरिज्ञानाश्रमगुरुवर्याः अलिन्दे स्थित्वा लघु-द्रोणी-परिमितं पवित्रं वर्णजलं प्रथमम् अधःस्थितानां साधकानामुपरि प्रोक्षणं कुर्वन्ति, पातयन्ति च। तत्क्षणे एव सर्वे जनाः प्राङ्गणे स्थापित-बृहद्-भाण्डेभ्यः जलं नीत्वा, परस्परेषु क्षिप्त्वा च खेलन्ति । तस्मिन् दिने अपि सर्वे साधकाः गुरोः आगमनार्थं प्रतीक्षां कुर्वन्तः आसन् । तदैव एषा घटना सञ्जाता ।

मम अष्टवर्षीया पुत्री स्नात्वा यदा स्नानगृहात् बहिः आगच्छन्ती आसीत् अकस्मात् मूर्च्छिता भूत्वा अधः पतिता । तस्याः ओष्ठौ नखाः च नीलवर्णीयाः जाताः । भीता अहं मम पतिम् आहूतवती । सः झटिति आगत्य तां हस्तद्वये उत्थाप्य अलिन्दस्य साक्षात् अधो भागे स्थितवान् । तस्मिन्नेव समये श्रीपरिज्ञानाश्रमगुरुवर्याः द्रोणीतः पवित्रजलं प्रत्यक्षम् अधः पातितवन्तः । तत् जलं मम पुत्र्याः उपरि निर्झरः इव पतितम् । तावत् पर्यन्तम् अहं रुदती गुरुं प्रार्थयमाना स्थिता आसम् ।

क्षणाभ्यन्तरे शीतलजलस्पर्शेन जागरिता मम पुत्री 'अम्मा' इति आह्वयन्ती उत्थितवती, भूमौ स्थितवती च । मम पतिः तां गुरुं नन्तुम् आदिष्टवान् । अहं सोच्छ्वासं हृत्पूर्वकं गुरुवर्येभ्यः कृतज्ञतां समर्पितवती । अनन्तरं दिनद्वयं सा ज्वरेण बाधिता आसीत् किन्तु गुरोः आशिषा शीघ्रमेव स्वस्था भूता । सा तु पुनर्जीवनं प्राप्तवती इति मम दृढविश्वासः।

अस्माकं यात्रा विना क्लेशम् अग्रे गता । गोवा, मुम्बई सर्वत्र यथेच्छा भ्रमणं कृत्वा, सर्वान् बन्धून् मिलित्वा अन्ते चेन्नै-नगरं यथाक्षेमं निश्चितसमये प्राप्तवन्तः । गुरुशक्तेः विपुलतायाः अनुभवः मया प्राप्तः ।

**निधये सर्व-विद्यानां , भिषजे भवरोगिणाम् ।**

**गुरवे सर्व-लोकानां , श्रीपरिज्ञानगुरवे नमः ॥**

# कथा मनीषापञ्चकस्य

– रवीन्द्र शिराली , मुम्बई

यदा श्रीमदादिशङ्कराचार्याणां काशीनगरे वास्तव्यम् आसीत् तदा प्रतिदिनं ब्राह्ममुहूर्ते गङ्गास्नानं कृत्वा कमण्डलुं गङ्गाजलेन पूरयित्वा काशीविश्वनाथस्य अभिषेकपात्रे तद् जलं गुरुवर्याः स्थापयन्ति स्म । अभिषेकः प्रतिदिनं प्रातःकाले सार्धचतुर्वादने आरभते स्म। तत्पश्चात् कोऽपि अभिषेकपात्रे जलं पूरयितुं न शक्नोति इति नियमः आसीत् ।

कस्मिंश्चित् दिने आचार्याः पद्मपाद-नाम्ना शिष्येण सह स्नानस्य पश्चात् जलं गृहीत्वा गच्छन्तः आसन् तदा मार्गे एकः चाण्डालः मार्जनीं गृहीत्वा अग्रे मन्दं मन्दं चलन् आसीत् । मन्दिरं परितः सर्वे मार्गाः अतीव सङ्कुचिताः । अतः आचार्याः अग्रे गन्तुं न शक्तवन्तः । आचार्याणां मुखात् " गच्छ गच्छ " इति शब्दाः उद्गताः । तत् श्रुत्वा चाण्डालः अवदत्...

**अन्नमयादन्नमयमथवा चैतन्यं चैतन्यमयात् ।**
**किं दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छ इति ॥**

" गच्छ गच्छ " इति किमर्थं वदसि । किं दूरीकर्तुं वाञ्छसि (मम अपवित्रं) स्थूलशरीरं वा (जीवस्य) चैतन्यं वा।

आचार्याणां मनसि चलतः विचारान् अवगम्य सः पुनरपि अवदत्...

**किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चण्डालवाटीपयः**
**पूरे चान्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाम्बरे।**
**प्रत्यग्वस्तूनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ**
**विप्रोऽयं श्वपचोऽयमित्यपि महान् कोऽयं विभेदभ्रमः ॥**



संविता-समीक्षा हट्टङ्गडी , पुण्यनगरी

चाण्डालवाटीपयसि वा गङ्गाजले वा दृश्यमानं सूर्यस्य प्रतिबिम्बं ( पवित्रताम् अपि ) समानं तथैव काञ्चनघट्यां वा मृत्कुम्भे वा वर्तमाने अम्बरे अपि समानम् । प्रत्येकस्य नरस्य मनसि जन्मतः निस्तरङ्गानन्दसागरस्य अनुभूतिः शक्या ( तस्य देहस्य पवित्रता न विचार्यमाणा ) । अतः श्वापदं भुज्यमानस्य चाण्डालस्य अपेक्षया विप्रः श्रेष्ठः इति विभेदभ्रमः किमर्थम् ?


चाण्डालस्य वाक्ताडनं श्रुत्वा तं पुनरपि पश्यन्तः आचार्याः तद्स्थाने साक्षात् भगवान्-शङ्करं दृष्टवन्तः।

तं विनम्य आचार्याः पञ्च श्लोकान् अवदन् । आचार्याणाम् इयं श्लोकरचना " मनीषापञ्चकम् " नाम्ना प्रसिद्धा भूता।

गुरुः कथम् अवगन्तव्यः इति मनीषापञ्चके सूक्ष्मतया आचार्यैः वर्णितम् अस्ति ।

# ईदृशः एकः राष्ट्रपतिः

**– सुधा भट कल्याणपूर , मङ्गलूरु**



अस्माकं पूर्व-राष्ट्रपतेः श्री. ए.पि. जे. अब्दुल कलाम्-महोदयस्य विषये इदम् एकम् अप्रकटितम् उपाख्यानम् ।

एकवारं राष्ट्रपतिमहोदयः कूर्गराज्यं प्राप्तवान् । कलाम्-महोदयस्य भाषणस्य कन्नडभाषायाम् अनुवादं कर्तुं डॉ. गुरुराजः करजगीः नियोजितः आसीत् । डॉ. गुरुराजः कलाम्-महोदयस्य परिचितः व्यक्तिः एव । तस्मिन् दिने कलाम्-महोदयः हेलिकोप्टर-यानेन आगत्य सभाङ्गणं प्रविष्टवान् । कार्यक्रमः प्रारभत । यदा गुरुराजः वेदिकायाः उपरि गन्तुम् उद्युक्तः तदा सः एकां पञ्चवर्षीयां रुदतीं बालिकां दृष्टवान् । पार्श्वे एव उपविष्टं तस्याः जनकं गुरुराजः तस्याः रोदनस्य कारणं पृष्टवान् । जनकः उक्तवान् – " सा राष्ट्रपतिमहोदयेन सह हस्तान्दोलनं कर्तुं गतवती परन्तु आरक्षकाः अनुमतिं न दत्तवन्तः तस्याः हस्तं प्रणुदितवन्तः च " इति । गुरुराजः किमपि न उक्त्वा वेदिकायाः उपरि गतवान् ।

राष्ट्रपतिमहोदयेन भाषणं कृतम् । अनुवादस्य कार्यमपि समाप्तम् । सम्प्रति गुरुराजः कलाम्-महोदयस्य समीपं गत्वा अवनम्य उक्तवान् - " महोदय, एकं वक्तुम् इच्छामि । " कलाम्-महोदयः यदा सम्मतिं दत्तवान् तदा गुरुराजः तस्मै रुदतीं बालिकां दर्शयित्वा उक्तवान् – " महोदय ! सा बालिका भवता सह हस्तान्दोलनं कर्तुम् इच्छति अतः रुदती अस्ति " इति। तदा कलाम्-महोदयः – " ओहोहो ! तर्हि ताम् अत्र आह्वयतु । " इत्युक्त्वा हस्तेन "आगच्छतु " इति सङ्केतं कृतवान् तथा आरक्षकं निर्दिष्टवान् च ।

तत्क्षणं सार्धषडङ्घ्रि-उन्नतः ( 6'5" feet tall) आरक्षकः तां बालिकां चटकां इव गृहीत्वा आनीतवान् । कलाम्-महोदयः ताम् उत्थाप्य स्वस्य अङ्के उपावेश्य निमिषार्धपर्यन्तं तया सह हस्तान्दोलनं कृतवान् । बालिका तु अतिसन्तुष्टा अभवत् । तदनन्तरं कलाम्-महोदयः उत्पीठिकायाः उपरि स्थितान् भर्जित-काजूतकान् गृहीत्वा तस्याः हस्ते स्थापितवान् अपि च पृष्टवान् – " मम स्वाक्षरम् (Autograph) इच्छसि किम् ? " इति । सा बालिका केवलं राष्ट्रपतिं पश्यन्ती आसीत् । सा किमपि वक्तुं न शक्तवती । श्रीकलाम्-महोदयः रिक्तकागदार्थम् इतस्ततः दृष्टवान् । किन्तु तेन रिक्तकागदं न प्राप्तम् । तदा उत्पीठिकायाः उपरि स्थितां कार्यक्रमस्य निमन्त्रणपत्रिकां गृहीत्वा तस्य पृष्ठभागे हस्ताक्षरं कृत्वा तां पत्रिकां तस्याः बालिकायाः हस्ते स्थापयितुं परिदृष्टवान् । परन्तु तस्याः हस्ते आसन् काजूतकाः !

एतत्सर्वं पश्यन् गुरुराजः कलाम्-महोदयस्य हस्तात् तत् कागदं गृहीत्वा बालिकाम् उत्थाप्य वेदिकायाः अवरुह्य तस्याः जनकस्य समीपे गतवान् । जनकम् उद्दिश्य उक्तवान् - " पश्यतु ! अद्य अत्र ५-६ दृश्यचित्रकाराः ( videographers ) सन्ति । ते पञ्चनिमिषपर्यन्तं वेदिकायाः उपरि घटितदृश्यस्य चित्रीकरणं कृतवन्तः । भवान् तेभ्यः चित्राणि गृह्णातु । तथैव एतं कलाम्-महोदयेन हस्ताक्षरकृतं कागदं आबन्धं (photo frame ) कृत्वा भवतः पुत्र्यै उपायनरूपेण ददातु । एकः जनकः ईदृश-अमूल्य-उपायनस्य अपेक्षया अन्यत् किं दातुं शक्नोति ! राष्ट्रपतिपदे प्रतिष्ठित-व्यक्तिना सह ईदृशसमारम्भे शताधिकजनाः हस्तान्दोलनं कर्तुम् इच्छन्ति । तेषाम् इच्छां पूरयितुं साध्यं किम् ? किन्तु अत्र कलाम्-महोदयः स्वयं भवतः लघुबालिकायाः इच्छां पूरितवान् । "

बालरञ्जनी

# एकाग्रता

**- शिल्पा मुद्गर , मुम्बई**

''अर्जुने एव आचार्यस्य विशेषा प्रीतिः । न सः अस्मासु अनुग्रहं करोति ।'

दुर्योधनस्य एतानि असूयायुक्त-वचनानि द्रोणाचार्यः श्रुतवान् । 'मम शिष्याणां यदि एषा मतिः, तर्हि कोऽपि उपायः कर्तव्यः' इति द्रोणाचार्यः चिन्तितवान् ।

गुरुः द्रोणाचार्यः पाण्डवान् कौरवान् च शस्त्रविद्यां शिक्षयति स्म । सर्वेषु शिष्येषु अर्जुनस्य कौशल्यं विलक्षणमासीत् । धनुर्विद्यायाम् अर्जुनस्य दक्षता ननु अद्वितीया । दिवारात्रं सः अभ्यासं कृत्वा अतीव निपुणः लक्ष्यवेधी अभवत् ।

अन्यशिष्येभ्यः तस्य कौशल्यं दर्शयितुं गुरुद्रोणाचार्यः एकस्याः स्पर्धायाः आयोजनं कृतवान् । सः एकस्मिन् वृक्षे एकं काष्ठनिर्मितं खगं स्थापितवान् । ततः सः शिष्यान् अवदत् – ' तस्य खगस्य नेत्रं लक्षीकृत्य बाणः क्षेप्तव्यः । '

एकैकशः सर्वे प्रयत्नं कृतवन्तः । पाण्डवेषु ज्येष्ठः युधिष्ठिरः बाणं क्षेप्तुं सज्जोऽभवत् । तदा आचार्यः तं पृष्टवान् – ' किं पश्यसि ?' युधिष्ठिरः अवदत् – 'खगं , वृक्षम् , आकाशं च । ' युधिष्ठिरस्य बाणः लक्ष्यात् भ्रष्टः अभवत् ।

तदनन्तरं दुर्योधनः पुरतः आगतवान् । ' किं पश्यसि ? ' इति आचार्येण पृष्टे सः उक्तवान् – ' वृक्षस्य शाखां, खगं, खगस्य मस्तकं, तस्य नेत्रं , तस्य शरीरं च । ' दुर्योधनः अपि लक्ष्यं न साधितवान् ।

ततः भीमः, दुःशासनः, अन्ये पाण्डवाः कौरवाः च ये ये आगत्य प्रयत्नं कृतवन्तः , ते सर्वे निष्फलीभूताः ।

यदा अर्जुनः धनुषि बाणं स्थापयित्वा खगं



दया बाळे कोप्पिकर , न्यू जर्सी

लक्षीकृतवान् , तदा आचार्यः तं पृष्टवान् – ' किं दृश्यते ? ' अर्जुनस्य उत्तरम् आसीत् – 'खगस्य नेत्रम् ।'

द्रोणाचार्यः – वृक्षः ?

अर्जुनः – न दृश्यते ।

द्रोणाचार्यः – शाखा ?

अर्जुनः – न दृश्यते ।

द्रोणाचार्यः – खगस्य चञ्चुः ?

अर्जुनः – न दृश्यते ।

द्रोणाचार्यः – अन्यत् किं दृश्यते ?

अर्जुनः – न किमपि । केवलं खगस्य नेत्रम् ।

द्रोणाचार्यः – मुञ्च बाणम् ।

अर्जुनः बाणं मोचितवान् । बाणेन साक्षात् खगस्य नेत्रं विद्धम् । कथ्यते यत् –

**ज्ञानतृष्णा गुरौ निष्ठा सदाध्ययन दक्षता ।**
**एकाग्रता महत्त्वेच्छा विद्यार्थिगुण-पञ्चकम् ॥**

एतैः सर्वगुणैः संपन्नः अर्जुनः स्वं श्रेष्ठशिष्यमिति प्रमाणीकृतवान् ।

### अधोदत्तपदानां सन्धिरूपाणि कथायां सन्ति । तानि कथातः उद्धृत्य रिक्तस्थानानि पूरयतु –

१. कः + अपि =

२. सज्जः + अभवत् =


३. विलक्षणम् + आसीत् =

४. श्रेष्ठशिष्यम्+ इति =

उत्तराणि अन्तिम-पृष्ठे दत्तानि

### शब्दपटः – ग्रीष्म-ऋतुः

-कामाक्षी बैन्दुर , बेङ्गलूरु




उत्तराणि अन्तिम-पृष्ठे दत्तानि

# तस्मै पाणिनये नमः

**- शुभदा वकनळ्ळी , टॉरोण्टो कॅनडा**

संस्कृत-व्याकरणस्य रचयिता महर्षि-पाणिनिः । तैः अष्टाध्यायी नाम्ना एकः ग्रन्थः रचितः। अस्मिन् ग्रन्थे व्याकरणस्य विषये ४००० सूत्राणि सन्ति। तानि सर्वाणि सूत्राणि अष्टसु अध्यायेषु विभाजितानि । प्रत्येकस्मिन् अध्याये चत्वारः पादाः सन्ति । आहत्य तस्मिन् ३२ पादाः सन्ति । अष्टानाम् अध्यायानां समाहारः इति अष्टाध्यायी । सूत्रपाठः इति तस्य अन्यत् एकं नाम ।

अष्टाध्यायी भागद्वये विभाजिता – सपादसप्ताध्यायी त्रिपादी च । सपादसप्ताध्याय्यां सप्त अध्यायाः अपि च अष्टम-अध्यायस्य प्रथमः पादः अन्तर्भूताः सन्ति (पादेन सह सप्ताध्यायी)। त्रिपाद्यां तु अष्टम-अध्यायस्य शेषाः त्रयः पादाः सन्ति ।

महर्षिपाणिनेः प्रमुखलक्ष्यम् अस्ति पदव्युत्पत्तिः । पदानि कथं निष्पन्नानि इति प्रदर्शनार्थं सूत्राणि विरचितानि ।

- **पाणिनीय सूत्राणां वैशिष्ट्यम् अस्यां कारिकायाम् उल्लेखितम् अस्ति –**

  अल्पाक्षरमसन्दिग्धं सारवत् विश्वतो मुखम् ।
  अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

  अन्वयः - सूत्रविदः अल्पाक्षरम् , असन्दिग्धं , सारवत् , विश्वतः मुखम् , अस्तोभम् , अनवद्यं ( च वाक्यम् ) "सूत्रं" विदुः ।

  विद्वांसः मन्यन्ते यत् अल्पैः अक्षरैः सारांशरूपेण स्पष्टरीत्या च उक्तं , यत् विश्वैः स्वीकृतं, यत् निष्किल्मिषम् अविरतं च वर्तते तत् सूत्रम् इति उच्यते । पाणिनि-सूत्रैः सम्पूर्णरीत्या सर्वाणि नियमानि पूरितानि ।

- **पाणिनीय-सूत्राणि षड् विधानि ।**

  संज्ञा च परिभाषा च विधिर्नियम एव च ।

  अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥

  १) **संज्ञासूत्रम्** = नामकरणं सूत्रम् । उदा. सुप्तिङन्तं पदम् (१.४.१४)

  २) **परिभाषासूत्रम्** = अनियमे नियमकारिणी परिभाषा । यत्र नियमः नास्ति, एतादृशं सूत्रम् आगत्य नियमयति । तेन अन्यसूत्राणाम् अर्थकरणं भवति । उदा. स्थानेऽन्तरतमः (१.१.५०)

  ३) **विधिसूत्रम्** = विधिं (कार्यं वा प्रक्रियां वा) उच्यते । उदा. इको यणचि (६.१.७६)

  ४) **नियमसूत्रम्** = पूर्वात् विद्यमानस्य नियमस्य सीमाम् आलिखति । उदा. रात्सस्य (८.२.२४)

  ५) **अतिदेशसूत्रम्** = एकस्मिन् शब्दस्वरूपे अन्यधर्मस्य आरोपणं करोति येन तस्य शब्दस्य स्वरूपं परिवर्तितं भवेत् । उदा. सार्वधातुकमपित् (१.२.४)

  ६) **अधिकारसूत्रम्** = एकस्मिन् पादे वा अध्याये वा बहुषु सूत्रेषु अस्य सूत्रस्य अनुवृत्तिः भवति । उदा. प्रत्ययः (३.१.१)

महर्षिपाणिनेः सूत्रपाठः, धातुपाठः, गणपाठः, उणादिपाठः लिङ्गानुशासनम् इति संस्कृत-व्याकरणस्य पञ्चाङ्गानि ।

महेश्वरात् प्राप्तानि शिवसूत्राणि (माहेश्वरसूत्राणि) अक्षरसमाम्नाय नाम्ना प्रचलितानि । वर्णमातृकायाः सूत्र-दृष्ट्या पुनर्व्यवस्था एव । तेभ्यः महर्षिपाणिनिः अनेकान् प्रत्याहारान् रचितवान् ।

महर्षिपाणिनिना लिखितः अष्टाध्यायीग्रन्थः , वररुचिना-लिखित-वार्तिकग्रन्थेन सह पतञ्जलिना-लिखितं महाभाष्येण सह च पठ्यते व्याकरणं छात्रैः । अतः अष्टाध्यायी, वार्तिकग्रन्थः , महाभाष्यं च पाणिनीयव्याकरणम् इति उच्यते । ग्रन्थकाराः महर्षयः-पाणिनिः , वररुचिः , पतञ्जलिः त्रयः मुनयः विश्वे वन्द्यमानाः सन्ति।

**येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।**
**कृत्स्नं व्याकरणं प्रोक्तं, तस्मै पाणिनये नमः ॥**
**वाक्यकारं वररुचिं, भाष्यकारं पतञ्जलिम् ।**
**पाणिनिं सूत्रकारं च, प्रणतोऽस्मि मुनित्रयम् ॥**
**॥ तस्मै श्रीपाणिनये नमः ॥**

## स्वाध्यायः

### रिक्तस्थलानि पूरयत -

१. महर्षिपाणिनिना _________ नाम्ना एकः ग्रन्थः रचितः। अस्मिन् ग्रन्थे व्याकरणस्य विषये _______ सूत्राणि सन्ति।

२. पाणिनीय-सूत्राणि ___ विधानि । ______, _______, ______, ______, _____, _____.

३. _________, _________, _________ च पाणिनीयव्याकरणम् इति उच्यते ।

४. ग्रन्थकाराः महर्षयः ______, _________, _________ त्रयः मुनयः विश्वे वन्द्यमानाः सन्ति।

उत्तराणि अन्तिम-पृष्ठे दत्तानि

## रुचिरा

## दीवकडगी – चाक्कॉ



**पाककृतिः – गीता नाडकर्णी, मुम्बई**

**अनुवादः – सङ्गीता पवार, मुम्बई**

### साहित्यम् –

दीवकडगी (अपक्व-पनसफलं – Breadfruit इति नाम्ना अपि ज्ञायते )

घर्षित-नारिकेलः – अर्धकटोर-परिमितम्

तैलम् – त्रिचमस-परिमितम् अथवा आवश्यकतानुसारम्

सर्षपः (Mustard) – एक-चमस-परिमितः

हिङ्गुः (Asafoetida) – आवश्यकतानुसारम्

हरिद्राचूर्णम् - एक-चमस-परिमितम्

मरीचिकाचूर्णम् - द्वि-चमस-परिमितम्

गुडः - द्वि-चमस-परिमितः

चिञ्चा-फलसारम् (Tamarind Pulp) - द्वि-चमस-परिमितम्



### कृतिः –

दीवकडगीं ( अपक्व-पनसम् ) निस्त्वचीं (peel) कृत्वा लघुशकलानि करोतु । एकस्मिन् पात्रे पनस-शकलानि स्थापयित्वा पात्रं बाष्पस्थाल्यां शीश्कारद्वयं भवति तावत् उच्चाग्नौ (on high flame) पचतु ।

यदा शकलानि शीतलीभवन्ति तदा तेषां किञ्चित् सम्मृदतु। भर्जनपात्रे (frying pan) त्रि-चमस-परिमितम् तैलम् उष्णीकरोतु । तस्मिन् एक-चमस-परिमितं सर्षपान् संयोजयतु । यदा सर्षपाः चट् चट् ध्वनिं कुर्वन्ति तदा हिङ्गुं , हरिद्रां , मरीचिकाचूर्णं , गुडं , चिञ्चा-फलसारं , सम्मृदित-अपक्व-पनस-शकलानि च संयोजयतु । घर्षित-नारिकेलम् अपि संयोजयतु । सततं सम्यक् आलोडनं करोतु (stir continuously) । दीवकडगी-चाक्कॉ सिद्धः अस्ति ।



## हास्यकणिका

**- सुधा भट कल्याणपूर , मङ्गलूरु**



वैद्यस्य समीपे गतः एकः व्यक्तिः स्वीयसमस्याम् उक्तवान् -

व्यक्तिः – भोः ! बसयाने अहं निद्रावशं भवामि । निद्राम् अवरोद्धुं किमपि औषधम् इच्छामि ।

वैद्यः – तर्हि का समस्या अस्ति ? सम्यक् निद्रां करोतु ।

व्यक्तिः – न , न वैद्यमहोदय ! तत् कथं साध्यम् ? अहं तु लोकयान-चालकः अस्मि ।

# छान्दोग्य -उपनिषत्

– कृष्णानन्द मङ्कीकर , मुम्बई

सामवेदस्य ब्राह्मणान्तर्गता छान्दोग्य-उपनिषद् अतिशया महत्त्वपूर्णा अस्ति । अस्यामेव ' **तत्त्वमसि** ' इति महावाक्यमुक्तं दृश्यते ।

इयमेका बृहदुपनिषत् । अष्ट अध्यायाः ये १५४ खण्डेषु विभाजिताः तथा ६३५ तमा श्लोकसङ्ख्या अस्ति अस्मिन्नुपनिषदि । ( ईशोपनिषदि १७-१८ श्लोकाः तथा केनोपनिषदि ३५ श्लोकाः सन्ति । )

अस्माकं गुरुवर्याः अनेकवारम् एकं शान्तिमन्त्रं विशदीकुर्वन्ति ' **आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि** ' इति शब्दैः प्रारब्धः अयं शान्तिमन्त्रः अस्मिन्नुपनिषदि एव ।

इयमुपनिषत् , ख्रिस्तपूर्वे ६०० – ८०० शकाब्दस्य मध्ये सङ्कलिता इति केचन विद्वज्जनाः मन्यन्ते ।

अस्मिन्नुपनिषदि, आदौ ॐकारस्य विवेचनमतीव विलक्षणम् । ' **उद्गीथः** ' इत्यनेन शब्देन ॐकारः सम्बोधितः ।

त्रिषु अध्यायेषु (६-८) अस्माकं पुरातनं तत्त्वज्ञानमुद्गीतमस्ति । षष्ठे अध्याये, श्वेतकेतु-उद्दालक-आरुणि-संवादः अतीव प्रसिद्धः ।


एतस्मिन् संवादे श्वेतकेतोः पिता उद्दालकः आरुणिः, श्वेतकेतोः द्वादश- वर्षाध्ययनानन्तरं पुत्रं पृच्छति , " किमधीतं त्वया ? (कः) आदेशः अप्राक्ष्यः येन अश्रुतं श्रुतं (भवति), अमतं मतं (भवति), अविज्ञातं विज्ञातं (भवति) " इति । " कोऽयमादेशः " इति श्वेतकेतुना पृष्टः आरुणिः तं कथयति, " यथा (हे) सोम्य एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं, ... यथा (हे) सोम्य एकेन लोहमणिना सर्वं लोहमयं विज्ञातम् ..." ।

तदुपरान्तं ' कथमेकमेवाद्वितीयं तत् आसीत् , कथं सृष्ट्याः सर्जनमभवत् ' इत्यादयः विषयाः सन्ति अस्मिन्नुपनिषदि । " तत्त्वमसि श्वेतकेतो " इत्युक्त्वा , ' सर्वं खल्विदं ब्रह्म ' इत्येव उद्दालकः आरुणिमहर्षिः प्रतिपादयति वा इति मन्यामहे । अन्यतराः अनेके गहनाः विषयाः प्रतिपादिताः अस्मिन्नुपनिषदि । एतत्पुनः कदाचिद्यथावकाशं पश्यामः ।

यस्यापि वेदान्तस्य गभीरं चिन्तनं कर्तुमिच्छा, तेन एताः दश उपनिषदः अवश्यं पठितव्याः अभ्यासितव्याश्च । एतासां ' छान्दोग्य ' तथा ' बृहदारण्यक ' एते द्वे बृहत्यौ । तयोः विषयाः अपि गहनाः । किन्तु यदि वेदान्तप्रवेशः कर्तव्यः तर्हि एतयोः अध्ययनमावश्यकमेव । शनैः शनैः प्रारम्भं कुर्वन्तु ईश-केन-इत्यादीनां पठनम् । वेदान्तप्रवेशः सुरुचिकरः भवेत् इति आशास्महे । इत्यलम् ।

शुभं भवतु ।

## योगविषये किञ्चित् ...



**लेखः – मीनाक्षी बलजेकर , ठाणे**
**अनुवादः – वैशाली कोप्पीकर , मुम्बई**

## पश्चिमोत्तानासनम्

आसनं विस्तीर्य तस्योपरि पृष्ठवंशं सरलीकृत्य उपवेष्टव्यम् । पादयुगलं पुरतः सरलं प्रसार्य स्थापनीयम् । उच्छ्वसन् हस्तद्वयम् उद्यम्य पृष्ठवंशम् अवनम्य पादद्वयस्य अङ्गुष्ठौ धर्तव्यौ । अनन्तरं मन्दं मन्दं शिरः जानुद्वयस्य समीपं नेतुं वा तस्मिन् स्थापयितुं वा प्रयत्नः करणीयः । ३-५ निमेषपर्यन्तं श्वसन् तस्यां स्थित्याम् एव स्थातुं प्रयत्नः करणीयः ।

**लाभाः –** सम्पूर्णपृष्ठभागेन प्रलम्बितेन भूतेन ग्रीवातः गुल्फौपर्यन्तं स्नायवः दृढाः कार्यक्षमाः च भवन्ति। उदरे भारस्य कारणेन पचन-उत्सर्जन-क्रिया समीचीना भवति । सम्पूर्णशरीरस्य आरोग्यवर्धनं भवति।

**वर्ज्यम् –** पृष्ठवंशविकारः येषां वर्तते तथा येषां गुदाङ्कुरः (Piles) वर्तते तैः वैद्यानां सूचनानुसारम् एव एतद् आसनं करणीयम् ।

### उत्तराणि

**बालरञ्जनी**

**शब्दपटः**

**वामतः दक्षिणम् –** ३) शीतपेटिका , ४) कलिङ्गम् , ७) फलरसम् , ९) पयोहिमम्

**उपरिष्टात् अधः –** १) व्यजनम् , २)टोपिका , ५) आम्रफलम् , ६) तरणम् , ८) तपनः

**एकाग्रता -** १) कोऽपि , २) सज्जोऽभवत् , ३) विलक्षणमासीत् , ४) श्रेष्ठशिष्यमिति

**स्वाध्यायः**

१) अष्टाध्यायी , ४००० २) षड् - संज्ञा , परिभाषा , विधिः , नियमः , अतिदेशः , अधिकारः

३) अष्टाध्यायी , वार्तिकग्रन्थः , महाभाष्यम् ४) पाणिनिः , वररुचिः , पतञ्जलिः

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति । पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code
for Enquiry Form